Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 3, Issue - 5, Sept-Oct – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 16/09/2020 Accepted on : 30/09/2020 Publication Date: 31/10/2020

# त्रिपुरसुन्दरीवेदपादस्तोत्रस्य भक्तिरसावलोकनम्

**[1]Ms. Priyanka Moharana, [2]Dr. Srikanta Parida,**
[1]Research Scholar, [2]Assistant Professor,
[1]Department of Sahitya, [2]Department of Language,
[1]National Sanskrit University, Tirupati, India,
[2]Amrita School of Arts & Sciences, Amrita Vishwa Vidyapeetham, Mysuru, India
Email – [1] priyanka.mna@gmail.com , [2] srikant.parida12@gmail.com

सारांश: परमेश्वरस्य भक्तिः तस्य वास्तविकज्ञानमेवास्माकं जीवनस्य परमः पुरुषार्थः। भक्तिरसपूर्णस्तोत्रकाव्यानि विशेषतया भक्तिरसपरकाणि भवन्ति। यतः स्तोत्रे देवादेवीनां तथा च महापुरुषाणां वन्दनं भवति अतः तेषु स्थलेषु भक्तिः एव अग्रस्थानं भजते। तादृशं भक्तिरसपूर्णं स्तोत्रकाव्यं वर्तते त्रिपुरसुन्दरीवेदपादस्तोत्रम्।

मुख्य शब्द**:** त्रिपुरसुन्दरीवेदपादस्तोत्रम्, भक्तिरसः, भक्तिकाव्यम्, शङ्कराचार्यभक्तिस्तोत्रम् ।

**प्रस्तावना :**

संपूर्णजगतः स्थावरजङ्गमवस्तुनामेकेव कारणं पालको रक्षको वा एक एव परमेश्वरः उच्यते। तं प्रति विश्वासः प्रीतिः तदादेशपालनं वा भगवद्भक्तिः मन्यते। अनेकशः लाभाप्रदा भगवद्भक्तिः, आद्यम् भगवद्भक्त्या मानवः निर्भीकः संजायते। अनया स महान्तमनिर्वचनीयं परमानन्दमाप्नोति। भगवद्भक्तिरेव अमृतरूपा यां लब्ध्वा पुमान् सिद्धो भवति, अमृतो तृप्तश्च भवति। सेवार्थक भज् धातोः क्तिन् प्रत्यये भक्तिरिति शब्दो निष्पद्यते। एकाग्रचित्तवृत्या परमशक्तेराराधनं सेवनम्, एकान्तचित्तीभूय भगवद्भजनं पूज्यसेवनं वा भक्तिरुच्यते। इश्वरानुरागः भक्तिरसस्य स्थायिभावः तथा औत्सुक्यहर्षनिर्वेदादयः संचारीभावाः। ईश्वरः भगवान् वा स्वयमस्य भक्तिरसस्य उल्लेख्यं कृतसस्ति। यथा- “भक्तिमात्रसनाराध्यः सुप्रीध ततो हरिः”[1]

भक्तिरसे भगवद्विषयकचिन्तनं जायते। भक्तिः ब्रह्मानन्दमाददाति। अस्य रसस्य मुख्यं प्रयोजनं ब्रह्मानन्दतुल्यम् अलौकिकपरमानन्दस्यानुभवः। अतः भक्तिरपि रसत्वेनाङ्गीकरणीयमेव। भगवद्भक्तिरियं द्विविधा भवति- आत्मसाक्षात्काररूपा लोकसंग्रहरूपा च। प्रथमं तावद्-रूपं भगवद् स्तुतिः सन्ध्योपासना-योगसाधनादिरूपेण भक्तेः प्रथमो सिद्धान्तपक्षम्। द्वितीयश्च यज्ञकर्मरूपेण भक्तेः क्रियात्मकं पक्षं प्रस्तौति। भगवद् स्तुतिपरकं स्तोत्रकाव्यानि भक्तिरसः प्रतिपादयितुम् अग्रणी भवति। स्तोत्रकाव्यानि एवभगवद् स्तुतिः प्रभुपूजाया भगवद्भक्तेश्च साधनरूपेण विद्यन्ते।

विश्ववक्षसि ये महामुनयः जन्म लब्ध्वा अस्य संसारस्य मार्गनिर्देशनं कुर्वन्ति तेषु महामुनिषु आचार्यः शङ्करः अन्यतमः। उक्तं श्रीमद्भगवद्गीतायाम् –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय संभवामि युगे युगे ।।[2]

इति श्रीमद्भगवद्गीतायां भगवत्स्वकीयप्रतिज्ञानुसारं लोककल्याणाय, अधर्मस्य विनाशाय,धर्मस्य स्थापनाय, दुष्टानां दलनाय साधूनां संरक्षणाय च समये समये स्वमायया नाना योनिषु, सत्ययुगे मत्स्य-कूर्म-वराह-वामन-नृसिंहरूपेण, त्रेतयां रामरूपेण, द्वापरे कृष्णबलरामरूपेण कलियुगे च बृद्ध-कल्किरूपेणावतीर्य भक्तानाह्लदयति, शास्त्रीयमर्यादां पालयति, सुखयति च समस्तं

[1] काव्यादर्श-२/२२७
[2] श्रीमद्भगवद्गीता – ४/ ७, ८

लोकम्। स एव सर्वव्यापकः सच्चिदानन्दघनस्वरूपः नित्योऽविनाशी परमात्मा भगवान् बोद्धव्यः। तस्मिन् परमानुरक्तिः अनन्यं प्रेम वा भक्तिः।

एतदनुसारं विश्वेऽस्मिन् धर्म संस्थापनाय अनेके महापुरुषाः समयानुसारं जन्म लब्ध्वा भक्त्यां संसारे शान्तेः वार्तां प्रसारयन्ति। तेषु महापुरुषेसु भगवान् शङ्करः अन्यतमः। भारतस्य वहुप्राचीनां वैदिकीं परम्परां पुनरुद्धारं कृतवान् अयं महान् पुरुषः। भिन्न भिन्न तीर्थक्षेत्राणां विकाशाय अस्य योगदानं महत्वपूर्णं वर्त्तते। आचार्यशङ्करः भगवतः शिवस्य परमभक्तः आसीत्। मातुः पार्वत्याः अपरैकः पुत्रः शङ्कराचार्यः इति कथनेन न कापि विप्रतिपत्तिः। शङ्कराचार्यस्य मातृभक्तिः प्रगाढा आसीत् ।अतः पार्वत्याः शङ्कराचार्यं प्रति वात्सल्यभावः कृपादृष्टिश्च आसीत्। पार्वतीपरमेश्वरयोः कृपावशात् ज्ञानविज्ञानसमायुक्ता आसीत् शङ्कराचार्यस्य धीः। स्वल्पवयसि एव सः संसारं त्यक्तवान्। परन्तु तदभ्यन्तरे रचितवान् अनेकविधं भक्तिवैभवम्। तेषु भक्तिकाव्येषु त्रिपुरसुन्दरीवेदपादस्तोत्रं विभिन्नगुणयुक्तं भक्तिपरकं स्तोत्रकाव्यं वर्त्तते। अस्मिन् स्तोत्रकाव्ये दशाधिकम् एकशतं पद्यं भिन्न भिन्न छन्दोबद्धं परिशोभते। शङ्कराचार्यस्य मतानुसारं स्वर्ग-मर्त्य-पातालेति त्रिषु पुरेषु यदि कापि सुन्दरी अस्ति तर्हि सा भवति माता पार्वती। अतः कविः मातुः सौन्दर्यं विभूतिं च वर्णयति, भक्तान् मातुः कृपाविषये निगदयति। प्रत्येकमपि पद्यं वेदतत्त्वपरिपूरितत्वात् स्तोत्रकाव्यस्यास्यनाम त्रिपुरसुन्दरीवेदपादस्तोत्रमिति।

परमेश्वरस्य भक्तिः तस्य वास्तविकज्ञानमेवास्माकं जीवनस्य परमः पुरुषार्थः। अतः काव्यवाङ्मये भक्तिरसपूर्णं काव्यं विरचयन्ति कवयः प्रशंसाभाजश्च भवन्ति। तत्रापि स्तोत्रकाव्यानि विशेषतया भक्तिरसपरकाणि भवन्ति। यतः स्तोत्रे देवादेवीनां तथा च महापुरुषाणां वन्दनं भवति अतः तेषु स्थलेषु भक्तिः एव अग्रस्थानं भजते। तादृशं भक्तिरसपूर्णं स्तेत्रकाव्यं वर्तते त्रिपुरसुन्दरीवेदपादस्तोत्रम्। यत्र मातुः त्रिपुरसुन्दर्यः स्तुतिः परिलक्षते।यथोदाहरणम् –

मुनिभिः स्वात्मलाभाय यच्चक्रं हृदि सेव्यते।
तत्र पश्यामि बुद्ध्या तदक्षरे परमे व्योमन्॥[3]

पद्येऽस्मिन् मुनीनां भक्तिभावं प्रदर्शयति। अत्र मुनयः विभावः। तेषां हृचक्रं ध्यानम् अनुभावः। हर्षः औत्सुक्यश्च व्यभिचारीभावः। ईश्वरानुरागः स्थायीभावः।

जटारुणं चन्द्रकलाललामं उद्वेललावण्यकलाभिरामम्।
कामेश्वरं कमशरासनाङ्कं समस्तसाक्षिं तमसः परस्तात्॥[4]

अत्र भगवान् शिवः विभावः। भगवतः शिवस्य चन्द्रकला वर्णनम् अनुभावः। औत्सुक्यं व्यभिचारीभावः। भगवतः शिवस्य कृते अनुरागः स्थायीभावः।

त्वमेव कारणं कार्यं क्रिया ज्ञानं त्वमेव च।
त्वामाम्ब न विना किंचित्त्वयि सर्वं प्रतिष्ठितम्॥[5]

अत्र माता अम्बा विभावः। मातुः कार्यम् अनुभावः। भक्तिः उल्लासश्च व्यभिचारीभावः। मातुः कृते अनुरागः स्थायीभावः।

शरणं करवाण्यम्ब चरणं तव सुन्दरी।
शपे त्वत्पादुकाभ्यां मे नान्यः पन्था अयनाय॥[6]

अत्र अम्बा विभावः। मातुः सौन्दर्यवर्णनम् अनुभावः। हर्षः व्यभिचरीभावः। मातुः कृते अनुरागः स्थायीभावः।

अनेन क्रमेण त्रिपुरसुन्दरीवेदपादस्तोत्रे सर्वाण्यपि दशाधिकैकशतपद्यानि भक्तिरसप्रपूरितानि सन्ति।

त्रिपुरसुन्दरीवेदपादस्तोत्रे आचार्येण न जीवगतानन्दंशमात्रमेव लक्ष्यीकृतम्, प्रत्युत आनन्दराशि भगवद्गीतानन्दस्यास्वादनमेवास्ति अस्य वास्तविकं लक्ष्यम्। अपि च भक्त्या भक्तस्य द्रवितं चित्तं नित्यं विभुं पूर्णबोधं

---

[3] त्रिपुरसुन्दरीवेदपादस्तोत्रम्, श्लोक - १३

[4] त्रिपुरसुन्दरीवेदपादस्तोत्रम् , श्लोक - १७

[5] त्रिपुरसुन्दरीवेदपादस्तोत्रम् , श्लोक- ३०

[6] त्रिपुरसुन्दरीवेदपादस्तोत्रम् , श्लोक -५६

सुखात्मकं च परमात्मनं नितरां समाश्लिष्यति, तदा किमप्यन्यत् कर्तव्यं नावशोषतया अवतिष्ठते। अर्थात् सर्वदेशव्यापकस्य नित्यसुखस्वरूपस्य सर्वतः परिपूर्णस्य परमेश्वरस्य द्रवीभूतेन चेतसा ग्रहणे कृतकृत्यतया न किञ्चिदवशिष्यते।

निष्कर्ष:

त्रिपुरसुन्दरीवेदपादस्तोत्रे अनेके गुणाः वर्तन्ते। तेषु गुणेषु विशिष्टं भवति श्रीमत्शङ्कराचार्यस्य भक्तिपरकं चिन्तनं स्पष्टतया ज्ञातुं सक्यते। समाजहितायै शङ्कराचार्यः भिन्न भिन्न समये जनान् उपदिष्टवान्। सर्वेऽपि जीवाः सुखेन तिष्ठन्तु इति शङ्कराचार्यस्य यत् मौलिकं लक्ष्यं आसीत् तद् लक्ष्यम् अत्र प्रस्फुटितं वर्तते। भक्तिरसकाव्यदृष्ट्या इदं शतककाव्यम् अतीव हृदयस्पर्शी वर्तते। अतः अस्य स्तोत्रकाव्यस्य प्रत्येकम् अपि पद्यम् भक्तिरसपूर्णा विभाति। भक्तिरसस्य शान्तरसस्य च व्यवहारे श्रीशङ्कराचार्यस्य भावुकता अस्य त्रिपुरसुन्दरीवेदपादस्तोत्रकाव्यस्य कलेवरं विमण्डयति।

**संदर्भ ग्रंथ सूची :**


1. गुप्तः, धर्मेन्द्रकुमार(१९७३), काव्यदर्शः टिका, मेहेरचन्द्र लछमनदास, दिल्ली
2. गोयन्दका, जयदयाल(२०१२), श्रीमद्भगवद्गीता तत्त्वविवेचनी, गीताप्रेस, गोरखपुर
3. शङ्कराचार्यः(२००४), शङ्करस्तोत्राणि, वेदान्तभारती कृष्णराजनगरम् मैसूरु मण्डलम्
4. आदिशङ्कराचार्यः(२००१), *देवीस्तोत्राणि भागः- १-२, वेदान्तभारती कृष्णराजनगरम् मैसूरु मण्डलम्*
5. शङ्कराचार्यः(१९८१), श्री शाङ्करग्रन्थावलिः, समता बुक्स्, माड्रास्
6. मधुसूदनसरस्वती(१९८८), अद्वैतसिद्धिः, परिमलपब्लिकेशन्स, दिल्ली
7. शास्त्री, चि.ना. विश्वनाथ(२००१), शङ्करस्तोत्रमुक्तावलिः, शृङ्गेरि श्रीजगद्गुरुमहासंस्थानम् शृङ्गेरि


**About the Author:**



**Ms. Priyanka Moharana** is currently Pursuing Ph. D. in Sanskrit at National Sanskrit University, Tirupati, Andhra Pradesh, India. She obtained her M. A. in Sanskrit in 2018 from Pondicherry University and M.phil. in Sanskrit Sahitya from Rashtriya Sanskrit Vidyapeetha, Tirupati in 2019. She has presented and published number of research paper in national and international journals and conferences. Her areas of interest are Sanskrit Literature, Yoga and Manuscriptology.



**Dr. Srikanta Parida** is currently serves as Assistant Professor in Amrita Darshanam (International Centre for Spiritual Studies), Amrita School of Arts and Sciences, Amrita Vishwa Vidyapeetham, Mysore campus, Karnataka, India. He has more than 1 year of teaching experience with 3 years of research experience. He has presented and published number of research paper in National and International Journals and Conferences. His areas of interest are Sanskrit Literature, Lexicography, Veda, Manuscriptology, Yoga and Indian Philosophy.